।। आदि कवी वाल्मिकी रचित ।।

# कव्यष्टक नाम़ श्रीगणेश स्तोत्र

चतु:षष्टी कोट्याख्यविद्याप्रदत्वां ।
सुराचार्य विद्या प्रदाना पदानं ।
कलाभिष्ट विद्यार्पकं दंतयुग्म ।
कवीं बुद्धिनाथं कवीनां नमामी ।।१।।

स्वनाथं प्रधानं महाविघ्ननाथं ।
निजेछ्चा विसृष्टांड वृंदेशनाथं ।
प्रभुं दक्षिणास्यस्य विद्याप्रदं त्वां ।
कवीं बुद्धिनाथं कवीनां नमामी ।।२।।

विभोव्यासा शिष्यादीविद्या विशिष्ट ।
प्रियानेक विद्या प्रदातार माद्यम् ।
महाशाक्त दीक्षागुरो: श्रेष्ठ्यदंत्वां ।
कवीं बुद्धिनाथं कवीनां नमामी ।।३।।

विधात्रे त्रयीमुख्य वेदांश्य योगं ।
महाविष्णवे चागमान् शंकराय ।
विशंतंच सूर्याय विद्यारहस्यं ।
कवीं बुद्धिनाथं कवीनां नमामी ।।४।।

महाबुद्धि पुत्राय चेकं पुराणं ।
दिशंतं गजास्यस्य माहात्मयुक्तं ।
निजज्ञान शक्त्या समेतं पुराणं ।
कवीं बुद्धिनाथं कवीनां नमामी ।।५।।

त्रयीशीर्षसारं रुचानेक मारं ।
रमा बुद्धिदारं परबह्मपारं ।
सुरस्तोम कायं गणोधादिनाथं ।
कवीं बुद्धिनाथं कवीनां नमामी ।।६।।

चिदानंद रुपं मुनिध्येय रुपम् ।
गुणातीत मीशं सुरेशं गणेशं ।
धरानंद लोकाधिवासं प्रियंत्वाम् ।
कवीं बुद्धिनाथं कवीनां नमामी ।।७।।

अनेकावतारं सुरक्ताब्जहारं ।
परं निर्गुणं विश्वसद् ब्रह्मरुपम् ।
महावाक्य संदोदृतात्पर्यमूर्तिं ।
कवीं बुद्धिनाथं कवीनां नमामी ।।८।।

इदंयेतु कण्यष्टकं भक्तियुक्ता ।
त्रिसंध्यं पठंते गजास्यं स्मरंत: ।
कवीत्वं सुवाक्यार्थ मत्यद्भुतंते ।
लभंते प्रसादाद् गणेश्यस्य मुक्तिम् ।।९।।

।। श्रीमद् गणेशार्पणमस्तु ।।